Bhalaksha Shastri

Stōtravali

स्तोत्रावलि:

Sanskrit

Paper – Printed (Book form)

1917 San (102 years old)

24 Folio

5.4" x 4.8"

Complete

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

राजा

श्री १०८ जगद्गुरुविश्वाराध्यायनमः ।

स्तोत्रावलिः ।

श्री भूकैलास काशीविबुधजनसंस्तुता ।

काशी श्रीमज्जगद्गुरुविश्वाराध्य
महा संस्थान जंगमवाटिका
मठ वास्तव्येन

पं. श्री भालाक्षशास्त्रिणा
संशोध्य प्रकाशिता ।

प्रथमा वृत्ति १०००) (सन १९१७ ई०

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

स्तोत्रावलिः ।

श्री गंगादेवी पदानि

जय जय हे हरमौलिविलासिनि । पाहि-सुधामयि जान्हविमां ॥ धृ ॥ सुरनरमुनिकिंनरनतचरणे । मुरहरसुरवर नुतकृतकरुणे ॥ १ ॥ जय जगदाद्ये जगदेकवंद्ये । जय जगदंबिके जगद्धितकारिके ॥ २ ॥ जगदेकपावनि । जगदेकपालिनि । जय जगज्जीविनि जयामृतरूपिणि ॥ ३ ॥ जय भुक्ति मुक्तिदे । जय भूति कीर्तिदे । जय सुखवरदेनीहतरिपुवृंदे॥४॥निजजलक्षालितकलिमलजाले। करुणरसामृतपालनशीले ॥५॥

२ पद

पाहि पाहिमां देविदेवि गंगे।पतितपावनि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

त्रिपथगामिनि । कामितार्थफलदायिनि ॥ धृ ॥
जगदुद्धारिणि । भवभयहारिणि । भक्तावितारिणि । भुवनविहारिणि ॥१॥ पतितोद्धारिणि । पापापहारिणि । दुरितविदारिणि । दुःखनिवारिणि ॥ २ ॥ दीनानुरक्षिणि । दैन्यविमोचनि । काशीनिवासिनि । कलुषविध्वंसिनि ३

३ पद

मंगलं गंगांबिके ललितचरिते ॥ धृ ॥ मंगलं जगदंब त्रैलोक्य विख्याते । तुंगपिप्पलवृक्षवन मंटपाश्रिते ॥१॥ शंकरप्रियगुणे । किंकरदेवगणे शंकारहितवाणि । पंकजोपमचरणे ॥२॥ मज्जनमात्रेण शुद्धान्करोषिदेवि । दुर्जनपापि वर्गानुद्धारयमहादेवि ॥ ३ ॥ लोलाक्षिमाहेश्वरि । देहि सुमतिंहि । बालं भवदाश्रितमूढं मांपरिपाहि ॥४॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

१ श्री विश्वनाथस्यपदम्

भज शंभुं भज शंभुं, भज गिरिजारमणं। भजगिरिजारमणं। स्मितशुभवदनं मानस। स्मितशुभवदनं मानस। भज भुजगाभरणं ॥ धृ ॥ गंगा भूषितपिंगल जटिलं। मधुपिंगल जटिलं। भस्मविभूषित भालं। भस्मविभूषित भालं। शोभितशशिमौलिं ॥ रविशशिलोचनपावकफालं। शिवपावकफालं। मुदितसुखपंचांबुजमालं। मुदितसुखपंचांबुजमालं। मृदुवचनदयालुं ॥ १ ॥ कर्णविभूषितव्यालं। कंठविराजितगरलं। कंठवि। गज व्याघ्राजिनचेलं। गजव्या। नरमस्तकमालं॥ भस्मोद्धूलिततुंदिलतनु तेजोमय शीलं। तेजोम। मालीकृत शेषाक्षसुमालं ॥ मालीकृत। महाकालं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

विशालं ॥ २ ॥ धारितडमरुत्रिशूलं । वृषभ-
ध्वजपटलं । वृषभ । शोभित शंख कपालं ।
शोभित ॥ वरदाभय करमालं ॥ मृगधनुष्परशु
विशालं । वलयीकृतव्यालं । वलयी । चक्रकमं-
डलुविमलं । चक्र । करदृश कमलं ॥ ३ ॥ वा-
मांकोपरिगौरीगणपालं । गौरीगण । वृषभारू-
ढहरहर । वृषभा । गणगर्जितकरतालं ॥ रजताचल
निलयाखिल मंगलांग सुमंगलं । मंगला ।
सुरासुरमुनिनर । सुरासुर । नतनुतपद्कमलं ॥४॥
काशीपुरसुखखेलं । गिरिजावरलीलं । गिरि-
जा । दिव्यपरात्परमखिलं । दिव्यपरा ॥
अपराजितमतुलं ॥ शरणागतजनपालं । नि-
खिलखलजनकालं । निखिल । सच्चित्सुखघन
सकलं । सच्चित् । निरसित जनजालं ॥ ५ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

१ श्रीमदन्नपूर्णा देवीपदं

जगदंबमां परिपाहि । पूर्णकरुणांबवरमुक्ति सुखमिहदेहि ॥ धृ ॥ शारदपूर्णेंदुसुंदरवदने । पूर्णबिंबाधरे दाडिमबीज रदने ॥ अर्धेंदुमौ- लिकृपार्द्राब्जलोचने । सुभ्रूः सुमुख पंकज मृदुवचने ॥१॥ विपुलाक्षिसुललाटसौंदर्य सदने । अनुपमचुबुक श्रीशोभित वदने ॥ मुखकांति- परिवाहमीनाभलोचने । तटिदिंदुरविकोटितेजः श्रीभवने ॥ २ ॥ फणिवेणिमणिमुक्ताभरणा भिभासे । मणिश्रेणि मंडित मुकुट विलासे । नासामणि भासितमंदहासे । कृपापूर्ण भक्त- चित्तांबुजवासे ॥ ३ ॥ चंपक कुसुमभासुर नासा शोभिते । विविध सुकुसुम सौगंधिक- कचलते ॥ सुलावण्य सल्लाप माधुर्यकलिते ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

सर्वाभरण सुभासुर कोमलमूर्ते ॥ ४ ॥ नासा-
मणितिरस्कृत तारागण माले । पद्मरागारुण
चारुकांति कपोले । कस्तूरिकुंकुम तिलकाल
कोज्वले । मांगल्यसूत्रशोभितेसर्वमंगले ॥ ५ ॥
कंबुगलांबुज माला मनोहरे । वररत्नकेयूर
भुजकक्षभारे । स्फुटमुक्ताफल चारुविद्रुमहारे ।
विविध सुमणि मुक्ताफलकर्णपूरे ॥ ६ ॥ वर
हेमसंदीप्तांबर परतरे अमृतकुंभाभय वरदर्वी-
करे ॥ महारत्न वरहेमांगुलि मुद्राहारे । बकु-
लचंपकपारिजातविहारे ॥ ७ ॥ नखचंद्रकांति
शोभितकरकमले । सुरत्नकंकण कांचीकुंडला
तुले । शेवंतिकाशोक मल्लिकामाले । सुधानंद-
करुणामयिसुखखेले ॥ ८ ॥ कस्तूरि परिमल-
लेपित विमले । चारु चंदन कमल कदंबालि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

लीले ॥ अमृत कुंभकुच करभोरू शीले । कनक किंकिणि नूपुर पाद कमले ९ विविध सुमणि मंडित वेदिसंस्थिते । सुरासुर मुनिनरनतपाद-राजिते । स्तूयमानात्मवैभव चारुचरिते । नित्य-निगमागमनुत लोकैक वंदिते ॥१०॥ निजतेजो-व्याप्तजगद्धितनिरते । निजानंदलीला वेदाद्यंत रहिते ॥ निर्धूताखिल घोर दुःखौघदुरिते । निजे-च्छारचितजगत्त्रयसंशोविते॥११॥सर्वोपकारिणि-करुणार्द्रचित्ते । निजकीर्ति सल्लाप मंडल भरिते ॥ जगदंब तवपाद पंकज सेवाभि र्ब्रह्माद-योऽखिलश्रियमाश्रयंते ॥ १२॥ सकले निष्कले सनातनी साक्षीभूते । सर्वसंपत्सुखेष्ट प्रदा-यिनि ललिते ॥ सगुण निर्गुण पुण्यपावनमूर्ते । सर्वभुक्ति मुक्तिप्रदे भक्तकल्पलते ॥ १३॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

आब्रह्माखिल शक्ति जगदेकाधारे । अनाधारा
ज्ञाधीन ब्रह्मादि धीरे ॥ अचिंत्याखिलरूपे
वाचामगोचरे । अजाच्युताद्यप्रतर्क्ये गंभीरे १४
अपराजिताद्वितीया परमहिमे । अनुपम शक्ति
रूपाक्षरे परमे । अगणिताघोर पराक्रमे भीमे
अणिमादिसिद्धि श्रीशोभाभिरामे ॥ १५ ॥
अखिलब्रह्मांडमंडलपरिपूर्णेनिखिलप्राणि गण
प्राणभरणेऽन्नपूर्णे । शरणागतार्ति हारिणि पूर्ण-
करुणे पूर्ण चरण कमल भक्तभव भीति हरणे ॥१६॥

१ श्रीदेवीपदानि

महिषासुर मर्दिनि । नमामि ॥ धृ ॥ महि-
षमस्तक नटन भेदिनि कामिनि भामिनि ।
प्रणतजनसंतोषदायिनि । कात्यायनि नारा-
यणि ॥ १ ॥ मदनमर्दन शंभुतोषिणि । योगिनि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भोगिनि । कमलनयनसहोदरि श्रीकात्यायनि मोक्षदायिनि ॥ ३ ॥ दुष्टराक्षस बाहु मंडल खंडिनि दंडिनि । शिष्टजन संकष्ट नाशिनि दुर्गेपार्वति सिंहवाहिनि ॥ ३ ॥

॥ २ पद ॥

पाहि भवानि शैलपुत्रिदेविदेवि पार्वति परमेश्वरिशिवे । अन्नपूर्णे । शक्तिरूपिणि । शुंभदैत्यमर्दिनि घनपाप नाशकारिणि । परम प्रताप शालिनि । सुगुणाभरणे । करुणा सदने । रुद्राणिसंततं । भद्राणि जननिमे । सुरसुंदरीनुते । वरयोगिपूजिते ॥ १ ॥ परमं चरणे । विश्वासं ते । निधायदैवतान्य न्निराकृतं । निर्दयंकथं । तवचित्तमुत्तमम् । पाहि ॥२॥ पतितजन पावन शीलेमां । जगदादिदेवते । नगराज पालिते ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भवपाशलग्नकं । भालाक्ष नामकं ॥ ३ ॥

॥ ३ पद ॥

अपर्णे पाहिमां सुपर्वभिःसन्नुते । सुपर्वभिःसन्नुते सुगीर्वाण सन्नते ॥ धृ ॥ कापितवनास्तिदया पापिनं विलोक्य । सोऽपिभगवान्निर्दयस्तथापिवां संप्रार्थये ॥ १ ॥ सर्व भुवनोद्धारिणि । सर्वदानव खंडिनि । सर्वमंगल कारिणि । पर्वतेंद्रनंदिनि ॥ २ ॥ शूलरोग जाललग्नं । काल शिक्षा निरयमग्नं । भालनेत्रं पालय । बालचापल्यं नगणय ॥ ३ ॥

॥ ४ पद ॥

चामुंडेश्वरि चंडिकेंऽबिकेदेवि ॥ धृ ॥ संनुत जनसंवर्धनतत्परे । निन्दित लोकनिरादरे । संगतजननिपदांकिते शांकरि । संगीतशालिनि ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

शूलकरे ॥ १ ॥ कुत्सितनिंदक नीचकुसुतः । पीडितभावो जायेत । कुत्रापिहि नहिकुमाता-यत्र चित्रमिदं तवचारित्रं ॥ २ ॥ चंडदोर्दंडदानवखंडिनि । पुंडरीकाक्षावतारिणि । रुंडाभरणार्धांगिनि भामिनि दंडार्हं पाहिपालिनि ॥३॥

॥ ५ पद ॥

सेवकावनि भवानिते मंगलं । सकल निगम संनुतार्यें निखिलधैर्यें विकलशौर्ये । ख्यातौदार्ये ॥ धृप ॥ मायातीते । यतिनते । वरधृते । सुरनुते । श्रितसदयेसितहृदये । ततविनये । कुवलय-वदने । मदगजगमने । सुरुचिरनयने । विशद-वरदे सुगुणा भरणे ॥१॥ शोभासीमे । नतरमे । धृतशमे । सुमहिमे । जितदनुजे । भृतमनुजे । हिमगिरिजे ॥ भवभयहरणे गतजनिमरणे । गण-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

हितकरणे । सुकृति सुकृति रचित चरिते ॥२॥
लीलाजाले । सुकुशले । धृतकले । हतखले । शिव-
दयिते भुविमहिते । शिवसहिते । मुनिजननवने ।
बुधमुखनटने । शिवतनुवचने । बसवपकवि हृदय
निलये । सेवकावनि भवानिते मंगलं ॥ ३ ॥

॥ ६ पद ॥

अमरांब मां परिपहि । चारु कुमुदाक्षिघ-
नभुक्तिसुखमिहदेहि ॥ धृप ॥ हरिवर ललिततुरंगे ।
निजचरण सेवक भवतिमिरपतंगे करतल
कलित कुरंगे । सारसरसिज मुखि रिपु पवन
भुजंगे ॥ १ ॥ अरुण दाडिमसम रदने ।
पूर्ण करुणावलोकन विरचित मदने । सरस
मधुरवीटि वदने । नव्यसुरुचिर फणिवेणि
गुणमणिसदने ॥ २ ॥ अमर निकर परि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पाले । घोरसमरसमय हतसुररिपुजाले । हिमगिरि वरपुण्यबाले । बालहिमकर डंबविडंबितपाले ॥ ३ ॥ शशिकांति मंडल करणे । देव कुसुमनिचय कृतनवनवाभरणे ॥ किसलय निभमृदु चरणे । भक्तिरसवारिनिधिमग्न जनबद्धकरुणे ॥ ४ ॥ मल्लिकोज्वल मंदहासे । सुरवल्लभसतिरति निहितविलासे । फुल्लचंपककुसुमनासे । देवमल्लिकार्जुन पतिनगुरुसिद्धवासे॥५॥

श्री १०८ जगद्गुरु विश्वाराध्याय नमः ।

श्रीमज्जगद्गुरु विश्वाराध्य सिंहासनाधीश्वराणां स्तोत्रपदानि ।

पद १

श्री विश्वाराध्याय मङ्गलं । शिव विश्वैकपालाय मङ्गलं ॥ विश्वेशजाताय विश्वादिबीजाय

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

श्री विश्ववंद्याय मङ्गलं ॥ धृ ॥ चरवृंदवंद्याय मंगलं । वरचर नीतिबोधाय मंगलं । गुरुरूपधराय गुरुराजिराजाय । परिपूतदेहाय मंगलं ॥ १ ॥ भवमूलभंगाय मंगलं । शिवशिव लिंग संगाय मंगलं । भव मंगलांगाय शिव पिंग चूडाय कवितुंगसेव्याय मंगलं ॥ २ ॥ काशीपुरेशाय मंगलं । कवि काशीनाथेशाय मंगलं । क्लेशापहाराय पाशप्रमोचाय श्रीशादि मान्याय मंगलं ॥ ३ ॥

२ पद ।

मंगलारति बेळगुवेनु मल्लिनाथगे । तुंगमहिमानादिरूप मंगलात्मगे ॥ धृ ॥ सोमकोटि धामसीम सोमभूषगे । कामितार्थफलद महामहिमशालिगे ॥ मंगलांगलिंग जंगमादिरूपगे ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

योगमार्ग निरतभवभंग देवगे ॥ २ ॥ देव देव दानवादि सिद्ध सेव्यगे । मुनिवरादि वृंदवंदितांघ्रिकमलगे ॥ ३ ॥ वरेण्यगण्य पुण्य कारुण्यमूर्तिगे । जन्ममरणराहित शरण्यशीलगे ॥ ४ ॥ आशापाशदोषरहित काशीवासगे । सेवकेष्टसिद्धि माळप शंभु रूपगे ॥ ५ ॥

३ पद ।

श्रीगुरुराड् जय। हरिहर। चरसन्नुत चरणांबुज ॥धृ॥ रागासुर हरि सन्निभ । नागासुरहर सन्निभ ॥ भोगकुधर कुलिशभव । रोगहरयोगिवर ॥१॥ अंग जवन जवनमा। तंगज घनकुसुदप तंगजमदपवनभु । जंग जंगमराट्॥२॥ परशिवाधवन । गरनिवासघन । तरदया सदन । सुरेशमेश सन्नुत । धरेशजेश भासुरांग ॥ ३ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

४ पद ।

जय जय हरीश योगिवरेण्य । भयचय हरनर सक्त कारुण्य ॥ धृ ॥ मंगल ततिमय । जंगम कृतदय । पिंगजटामय । भो गताशय ॥ १ ॥ शिव मतदीक्षा भविमत शिक्षा । करणविचक्षण । भावुकेक्षण ॥२॥ शिव जीवैक्य । शिवशास्त्र बोध । श्रवण समागत शैवयमिव्रज ॥ ३ ॥ त्वत्पद तोय । तत्परकाय । सत्पुरुषावलिगेय । गुणचय॥४॥काशी पुरवर । काशविश्वाराध्य । भासपीठाचार्य । मत्कृपाकर ॥५॥

५ पद ।

मंगल मयजया । नंग मदापह । तुंगहरीश्वर जंगमनाथ ॥ धृ ॥ अक्षयचरित स । दक्षमालाधर । शिक्षितखल जन । रक्षित सुजन ॥ १ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

शीलयुत भसित । भाल पशुपमत । मूल सुगुण मणि । माल दयाकर ॥ २ ॥ भद्र सुखस । सुद्र गुरूत्तम । रुद्र सदृश वीरभद्र कृपाकर ॥ ३ ॥

६ पद ।

मंगलमयिते । भवतु हरीश । जंगम वाटिका तुंगमठेश ॥धृ॥ पार्वण शशधर । पांडुर कीर्ते । शर्वपदार्चन धूर्वहमूर्ते ॥ १ ॥ चरसंतर्पण निरत मनीष । गुरुवर शमदम गुण मणि भूष ॥ २ ॥ वीरशैवान्वयवारिधि चन्द्र । धीरहृदय सुविचार चरेंद्र ॥ ३ ॥ करुणारस वरुणालय देव । शरणागत जन भरणस्वभाव ॥ ४ ॥ मल्लिकार्जुन स्वामि सत्कृत पट्ट । पल्लवपद हत दुरित घरट्ट ॥ ५ ॥

७ पद ।

श्रीराजेंद्र पालय विभो । पालय विभो

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥धृ॥ सुगुण जलनिधे घनदया निधे। क्षुत्पिपास पीडितात्मजनसुधांबुधे ॥१॥ चरणपंकज। नयन सलिलज । दीननाथ दानशील विजितचित्तज ॥२॥ बुधजनावृत। विविध नरनुत। योगमार्गनिर तयोगीन्द्रपूजित॥ ३॥ सुमतिदर्शन। शुभतपो-धन। शंभुरूप काशिकासुमृगवरासन ॥ ४ ॥

८ पद ।

शिवलिंग श्रीदेवराड् विभो ॥ सोमपूजा शील । कामकालकाल । कामितार्थजाल। देवभूमिजलील ॥ १ ॥ नित्यनियमदक्ष । सत्य संघरक्ष। भृत्य जन सुपक्ष। प्रत्यवायशिक्ष॥ सागरांतारंभ। वीरशैवस्तंभ । योगिमति कदंब । शोभामुकुरबिंब॥ २ ॥ धीरोदात्त-रूप। धीरजनप्रताप। वैरिध्वांतदीप । सार

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

चिद्या कलाप ॥ प्रेमिमानवसोम । यमि कुल-
ललाम । प्रेमशून्यभीम । कोमलांग श्रीमन्
॥ ३ ॥ भानुकांतिपुंज । सानुरागरंज । नाना-
दुरित भंज । पावनांघ्रिकंज ॥ भालनेत्रवेद्य ।
बालमत्यवेद्य । पालयसुवेद्य । लालनीयपद्य॥ ४ ॥

९ पद ।

श्रीगुरु शिवलिंग प्रभुवर । शङ्कर॥धृ.॥वैकुंठ
नाथनुत । श्रीकण्ठ रूपधर । शैवमत दैवजित
वैवस्वत पालयमां ॥ १ ॥ सर्वेश भवनाश ।
गर्वहरण शर्व । भव्यजन सेव्य घन । दिव्यपद
पालयमां ॥ २ ॥ आचारधुरंधर । विचार पर
तर । पुण्याधिक गण्य महिमा वरेण्य पालय
मां ॥ ३ ॥ ज्ञानपीठाधिनाथ । सुज्ञानवृतदान
काशसुप्रकाश वरतोषभूषपालयमां ॥ ४ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

१० पद ।

श्री शिवलिंग महास्वामिन् । पाहि समाश्रित जन निवहं । भसित विराजित निटिलतट । देवेश योगीश परमेश सर्वेश सामंत नत चरण ॥ १ ॥ काल मतंगज मृगराज । नुतयति- कुलनयनांभोज । अन्यतनो । सुन्दरवदन । शशिशेखर । महिमाकर । गुणसागर । परमे- श्वर । शांतमुनिनिकर ॥ २ ॥ भो भो गुरुवर- पुरहर । परतर । यतिवर । बहु संकटयुतनर- जालं । पालय करुणाकर त्वरितं ॥ ३ ॥

११ पद ।

श्री शिवलिंग देव दयानिधे । भावजापह शिव वरद ॥ धृ ॥ परतर योगिराट् । कीर्तित सुयशो । घरतापत्रयतरुपरशो ॥ १ ॥ सुर- नृप भूसुरशास्त्रवनमित । परशिव व्रतधर ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

सच्चरित ॥ २ ॥ तव चरणांबुजस्मरणं देहि ।
भवजालावृतजनततिं पाहि ॥ ३ ॥

१२ पद् ।

श्रीशिवलिंगस्वामिनं भजे सदा । श्रीशिवगुरुवरं योगिवरेण्यं ॥ धृ ॥ सदमल नवनीतकोमलहृदयं । निर्मलगुणजननुतयशोनिलयं ॥ १ ॥ विद्याजलनिधिवर्धनचंद्रं । विद्याधनमहाजनगणसांद्रं ॥ २ ॥ विश्वेश्वरपुरि । सुखतरवासं । विश्वाराध्यसिंहासनाधीशं ॥३॥

१३ पद् ।

देवकायो श्रीशिवलिंगेशने । भवानीशसमभव्यदेहधाम । तव पादकाम । निवहसुप्रेम ॥ १ ॥ वीरशैववारिधिचंद्रमा । पारभवसागरदिंपोरियै ॥ २ ॥ धराणियोळुरु तरवाराणसी पुरदि मेरेव गुरुवरेण्यने ॥ ३ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

१४ पद ।

शिवलिंगयते भवभंगुरशिव ॥ मंगलं । जंगम । पुंगव । तुंगप । तंगज । भंगुरशिव ॥ १ ॥ सदमलतरकिरण । विदलितजनिमरण । मदनमद विहरण । सदयहृदय । करुणभरित । दुरितरहित । चरित । धीरनुतसारसपद सारस शिवलिंग ॥ २ ॥ शमदम गुणसदन । हिमकर समवदन । यमहरपुरसदन । असितलसित सुसित हासित । शीलगुणजालमणिमाल शिवलिंग ॥३॥

१५ पद ।

मंगलमय शिवलिंयते भव । भंगुर जय जय जंगमपुंगव ॥धृ॥ खंडित सुमशर । दंडित यमनत । पंडित दयागुणमंडित निरुपम ॥१॥ मंदर भूधर । मंदिर सन्निभ । बंधुरतरमद सिंधुरमृगवर ॥ २ ॥ वाराणसीपुरा । गारपरा-

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

त्पर । सारसुगुणमणिहार कृपाकर ॥ ३ ॥

१६ पद ।

पालयमां श्रीकाशीपुरेश । जंगमवाटिका तुंगमठेश ॥ धृ ॥ विश्वेश्वर संभूत विश्वाराध्य । वरतपोधन काशीवास महेश ॥ १ ॥ मल्लिकार्जुन महामहिम परात्पर । जगद्गुरुवर सिंहासनाधीश ॥ २ ॥ मंगलमय शिवलिंग योगीश । तुंगमहिमभवभंगचरेश ॥ ३ ॥ हरीश्वर योगिवर संनुतसदाचार । शरणागतोद्धार । दीनदयाकर ॥ श्रीवीरभद्रेश्वर रुद्रावतार । भवभजकाभय भक्तदयाकर ॥ ५ ॥ श्रीराजेश्वर । राजराजार्चित । जगदाचार्य वर पुण्यकारुण्यमय ॥ अंगज भंगशिवलिंग यतीश्वर । तुंगदयाकर । लिंगपूजापर ॥ ७ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

१७ पद ।

शिवलिंगदेवेशपाहि । भवहृतनरचयपोषकवरद ॥ धृ ॥ सुरनरपूजितचरणसरोरुह । स्मरकारिहरिवर गुरुवर सततम् ॥ १ ॥ शमदमगुणमणिभूषितदेह । दयारसपूरित कोमलहृदय वरवाराणशीपुरपातिसुखसं । भूत विश्वाराध्यपीठाधिनाथ ॥ २ ॥

१८ पद ।

शिवलिंगयतिवर पाहि । भवभंगनतनरमांहि ॥ धृ ॥ वरवीरशैवमतवारिधिसोम । परमतभीम चरसार्वभौम जितकाम ॥ १ ॥ शरदिंदुसुंदरवदन । सुरवृन्दवंदितचरण । शरणागतार्तिभयहरण ॥ २ ॥ अज्ञानतिमिर पतंग । विज्ञानबुधजनसंग । सुज्ञानसिंहासनाधीश ॥ ६ ॥

इति ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

आरोगमैं केष्ट और संसार

सुखप्रकट करने वाली वैद्य विद्या

पुस्तक मंगानी है २८ पृ होना कि पुस्त

क हूँ पता र लेकर के भेजना चाहिए

राजवैद्य ... जी के शाव

जी मोहे ... आपिस

पो. जामनगर काठियावाड़

काशी रामघाटस्थ हितचिंतक मुद्रणालये
बी० एल् पावगी द्वारा मुद्रिता ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri